# Shri Parshvanathastavanam

# શ્રીપાર્શ્વનાથસ્તવનમ્

## Document Information

```
Text title : pArshvanAthastavanam
File name : pArshvanAthastavanam.itx
Category : deities_misc, jaina, bIjAdyAkSharamantrAtmaka
Location : doc_deities_misc
Proofread by : DPD
Latest update : March 31, 2019
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2023

*sanskritdocuments.org*

# શ્રીપાર્શ્વનાથસ્તવનમ્

અથ શ્રીપાર્શ્વનાથસ્તવનમ્ ।

ધ્યાનં

હ્રીં દેવં પાર્શ્વનાથં ધરણિપતિનુતં દેવદેવેન્દ્રવન્દ્યં
હ્રીઙ્કારં બીજમન્ત્રં જગદકલિમલં સર્વોપદ્રવ્યહારી ।
ૐ હ્રાં હ્રીં હૂઁકારનાદં અઘહરતિ મહાભક્તિરૂપં જનાનામ્ ।
વ્યાલીઢં પાદપીઠં કમઠશઠમતિં માહ્વયં પાર્શ્વનાથમ્ ॥ ૧॥

ૐ હ્રીં અર્હં શ્રીપાર્શ્વનાથાય અત્રાવતરાવતર સંવૌષટ્ સ્વાહા । આહ્વાનનમ્ ।
ૐ હ્રીં અર્હં શ્રીપાર્શ્વનાથાય અત્ર તિષ્ઠ તિષ્ઠ
ઠઃ ઠઃ સ્વાહા । સ્થાપનમન્ત્રઃ ।
ૐ હ્રીં શ્રીપાર્શ્વનાયાય અત્ર મમ સન્નિહિતો
ભવ ભવ વષટ્ સ્વાહા । સન્નિધાપનમ્ ।

અથાષ્ટકમ્ ।

પૂજનવિધિઃ ।

હ્રીંહ્રીંઙ્કારબીજં ભૂરિરૂપતેજં ગુણાધિકરાજ્યં સુરાધિપપૂજ્યમ્ ।
ક્ષીરાબ્ધિસુવારિભિઃ કાશ્મીરયુક્તૈર્ભવકલ્મષહારૈર્જિનમર્ચયામિ ॥

ૐ હ્રીં સકલમન્ત્રવીજાય હ્રીંઙ્કારાય વિશ્વવિઘ્નહરણાય ॥ જલમ્ ॥ ૧॥

હું હ્રોઙ્કારનામ્ની પરં સ્ફોટયાપં જનાનાં સુખદાયકં વિઘ્નહારમ્ ।
દેવરણ્યશ્રીખણ્ડકુઙ્કુમયુક્તૈર્વપુસ્તાપહારૈર્જિનં પૂજયામિ ॥ ગન્ધમ્ ॥ ૨॥

ૐ હ્રીં દેવમન્ત્રં વામાદેવીસુતં અખણ્ડં પદં નિર્મિતં પાર્શ્વનાથમ્ ।
ક્ષીરાબ્ધિપ્રફેનૈઃ સમં તણ્ડુલૌઘૈરખણ્ડૈરક્ષતૈર્ગતહેમપાત્રૈઃ ॥

અક્ષતમ્ ॥ ૩॥

ક્ષૂં હૂં રક્ષ રક્ષ ભૈરવાતિભીમાં હ્રાઁ હૂઁ હ્રઃ

વહનનસ્ફુટાબન્ધબન્ધમ્ ।
જપાજાતિમોગરચમ્પકપુષ્પૈ રણદ્ગન્ધલુબ્ધૈર્ભ્રમદ્ભમરવૃન્દૈઃ ॥

પુષ્પમ્ ॥ ૪॥

વમં હંસબાધં સુધાબીજમન્ત્રં ક્ષુધાવેદનિવારિતં પાર્શ્વનાથમ્ ।
વટાખજ્જકૈર્મોદકૈઃ શાલિભક્તૈઃ ગતૈર્હેમપાત્રે બહૂઅન્નપાકૈઃ ॥

નૈવેદ્યમ્ ॥ ૫॥

ક્ષ્માં ક્ષ્માં બીજસારહરિદ્દેહવર્ણં હરન્મોહધ્વાન્તં જિનાધિપપૂજ્યમ્ ।
જ્વલદ્દીપઘૃતાદિકર્પૂરયુક્તૈઃ શિખાપિઙ્ગવર્ણૈર્યથાવગ્રનેત્રૈઃ ॥

દીપમ્ ॥ ૬॥

ભ્રં ભ્રં ભ્રઃ પ્રસૂતં હતં શાકિનીનાં મહત્ક્રૂરકર્મં દહન્ દગ્ધરૂપમ્ ।
લસદ્ધૂપધૂમ્રૈઃ કૃષ્ણાગુરુધૂપૈઃ સુગન્ધીકૃતાઙ્ઘ્રિ
જિનં પૂજયામિ ॥ ધૂપમ્ ॥ ૭॥

સ્ક્ષીં સ્ક્ષીં વસનાદં જગત્પૂજ્યવાદં હતાદુષ્ટદુઃખં ગતાભીષ્ટરૂપમ્ ।
ફલૈર્દાડિમૈર્દ્રાક્ષકૈર્માતુલિઙ્ગૈઃ જિનં પૂજિતં
શ્રીફલૈર્ભાવયુક્તૈઃ ॥ ફલમ્ ॥ ૮॥

આપૈર્ગન્ધૈરક્ષતૈઃ પુષ્પશ્ચારુદીપધૂપૈઃ ફલૈરર્ઘૈઃ ।
કાઞ્ચનપાત્રૈર્મઙ્ગલદાનૈર્દદ્યાદર્ઘં શ્રીજિનનાથમ્ ॥

ઇત્થં મન્ત્રં નિત્યં ધ્યાયન્ તસ્મિન્ સિદ્ધિં ચ પ્રદેયમ્ ।
વામાસુતં પદ્માસેવ્યં ભક્તિભાવમર્ચિતં ચ ॥

અથ સ્તોત્રમ્ ।
શ્રીમદ્દેવેન્દ્રવૃન્દામલમણિમુકુટં જ્યોતિષાં ચક્રવાલૈ-
બ્યાલીઢં પાદપીઠં શઠકમઠકૃતોપદ્રવાબાધિતસ્ય ।
લોકાલોકાવભાસી શ્વખરુવિમલજ્ઞાનસદ્દીપકં ચ
પ્રધ્યસ્તધ્વાન્તજાલઃ સ વિતરતુ સુખં સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૧॥

હ્રાં હ્રીં હ્રૂઁ હ્રૌઁ વિભાસ્વન્મરકતમણિકાકાન્તમૂર્તે ! હિમં ચ
હં સં તં બીજમન્ત્રૈઃ કૃતસકલજગત્ક્ષેમરક્ષોરુવક્ષઃ ।
ક્ષાં ક્ષીં ક્ષાં ક્ષૌં સમસ્તક્ષિતિતલમહિતા જ્યોતિરુદ્યોતિતાર્થં
ક્ષૈં ક્ષાં ક્ષૌં ક્ષઃ ક્ષિતબીજો ગુરુશુભભરૈઃ

સંસ્તુવે પાપ્નર્વનાથમ્ ॥ ૨॥

હ્રીઙ્કારે રેફયુક્તં રરરરરરરં દેવસંસં પ્રયુક્તં
ૐ હ્રીં ક્લીં ક્લં(હ્રાંહ્રીં) સમેતં વિપદમદકલાકચ્ચકોદ્ભાસિ હું હુમ્ ।
ધું ધું ધું ધૂમ્રવર્ણૈરખિલમહિજગન્મોહિદેહ્યાનુકૃષ્ટે
વૈષણ્યન્ત્રં પતન્તં ત્રિજગદધિપતે ! સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૩॥

આં ક્રૌં હ્રીં સર્વવશ્યં કુરુ કુરુ સરસં ક્રામણં તિષ્ઠ તિષ્ઠ
ક્ષૂઁ હૂં હૂં રક્ષ રક્ષ પ્રબલતરમહાભૈરવારાતિભીમૈઃ ।
હ્રાં હ્રીં હ્રૂં દ્રાવયેતિ દ્રવ હન હન ફટ્ ફટ્ વષટ્ બન્ધ બન્ધ
સ્વાહામન્ત્રં પઠન્તં ત્રિજગદધિપતે સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૪॥

હં સં ઝ્વીઁ ક્ષ્વીં સહંસઃ કુવલયકલિતૈરચિન્તાઙ્ગઃ પ્રસૂનૈ-
ઇવીં ભઃ હઃ ધર્ક્ષ્હંસ હરહરહહહં પક્ષિપઃ પાક્ષિકોપમ્ ।
પંવં હંસઃ પવમ્મં સરસર સરસત્સત્સુધાબીજમન્ત્રૈઃ
સ્નાયસ્થાને પરત્નૈઃ પ્રબલતિ વિમુખં સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૫॥

ક્ષ્માં ક્ષ્માં ક્ષ્મૂં ક્ષ્મૌં ક્ષ્મઃ રેતૈ..aપતિ વિનુતં રત્નદીપૈઃ પ્રદીપૈઃ
હાહાકારોગ્રનાદૈર્જ્વલદ્દહનશિખાકલ્પદીર્ઘોર્ધ્વકેશૈઃ ।
પિઙ્ગાક્ષૈર્લેલિજિહ્વૈર્વિષમવિષધરાલઙ્કૃતૈસ્તીક્ષ્ણદંષ્ટ્રૈ -
ર્ભૂતૈઃ પ્રેતૈઃ પિશાચૈરનઘકૃતમહોપદ્રવાદ્રક્ષિતારમ્ ॥ ૬॥

ઝાં ઝીં ઝઃ શાકિનીનાં સપદિ હરપદં ત્રિવિંશુદ્ધૈર્વિબુદ્ધૈઃ
ગ્લૌં ક્ષ્મં ડં દિવ્યજિહ્વાગતિમતિકુપિતં સ્તમ્ભનં સંવિધેહિ ।
ફટ્ ફટ્ સર્પાદિરોગં ગ્રહમરણભયોચ્ચાટનં ચૈવ પાર્શ્વ
ત્રાયસ્વાશેષદોષાદમરનરવરૈઃ સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૭॥

સ્ક્ષ્માં સ્ક્ષ્મીં સ્ક્ષ્મૂં સ્ક્ષ્મૌઁ સ્ક્ષ્મઃ પ્રબલસુફલદં મન્ત્રબીજં જિનેન્દ્રં
રાં રોં રૌં રૂં રઃ પ્રમહ...મહિતં પાર્શ્વદેવાધિદેવમ્ ।
ક્રાં ક્રીં ક્રૂં ક્રૌં ક્રઃ જજજજજજરા જર્જરીકૃત્ય દેહં
ધૂં ધૂં ધૂં ધૂં ધૂં ધું ધું ધું સસમદુરિતહં સંસ્તુવે પાર્શ્વનાથમ્ ॥ ૮॥

ઇત્થં મન્ત્રાક્ષરોત્થં વચનમનુપમં પાર્શ્વનાથં સનિત્યં
વિદ્વેષોચ્ચાટનાદિસ્તભનજયવશં પાપરોગાપનોદિ
પ્રોત્સર્પજ્જઙ્ગમાદિસ્થવિરવિષમુખધ્વંસનં સ્વાયુદીર્ઘૈ-
રારોગ્યૈશ્વર્યયુક્તો ભવતિ યશઃસુખં સ્તૌતિ તસ્યેષ્ટસિદ્ધિઃ ॥ ૯॥

ઇતિ શ્રીપાર્શ્વનાથસ્તવનં સમ્પૂર્ણમ્ ।

Proofread by DPD

*Shri Parshvanathastavanam*

pdf was typeset on July 13, 2023

Please send corrections to *sanskrit@cheerful.com*